Shri Raghunath Temple MSS. Library,
JAMMU

No. २००५-घ

Title सनत्कुमार तन्त्रे त्रैलोक्यमङ्गलकवचम्

Author

Extent ३ Age

Subject तन्त्रम्

सनत्कुमारतंत्रे त्रैलोक्यमङ्गलंनामकवचम्

१००५

॥श्रीगुरुभ्योनमः॥ ॥पुलस्त्य उवाच॥ भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशितं
त्रैलोक्यमंगलं नाम कृपया कथय प्रभो॥१॥ ॥सनत्कुमार उवाच॥ शृणु विप्रेंद्र
वक्ष्यामि कवचं परमाद्भुतं। नारायणेन कथितं कृपया ब्रह्मणे पुरा॥२॥ ब्रह्मणा
कथितं मह्यं तवस्नेहाद्वदामि तत्। अतिगुह्यतरं तत्त्वं ब्रह्ममंत्रौघविग्रहं॥३॥ य
च्छ्रुत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवं। यच्छ्रुत्वा पठनात्पाति महालक्ष्मीर्जग
त्त्रयं॥४॥ पठनाद्धारणाच्छंभुः संहर्ता सर्वतत्त्ववित्। त्रैलोक्यजननी दुर्गा महि
षादिमहासुरान्॥५॥ वरदृप्तान् जघानैव पठनाद्धारणाद्यतः। एवमिंद्रादयः स
र्वे सर्वैश्वर्यमवाप्नुयुः॥६॥ शिष्याय विष्णुभक्ताय साधकाय प्रकाशयेत्। शठाय प
रशिष्याय दत्त्वा मृत्युमवाप्नुयात्॥७॥ त्रैलोक्यमंगलस्यास्य कवचस्य प्रजापतिः॥
ऋषिश्छंदश्च गायत्री देवो नारायणः स्वयं॥८॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकी
र्तितः॥ ॐ प्रणवो मे शिरः पातु नमो नारायणाय च॥९॥ भालं पायान्नेत्रयुग्ममष्टार्णो

भुक्तिमुक्तिदः। क्लीं पायाच्छ्रोत्रयुग्मं तु एकाक्षरः सर्वमोहनः॥१९॥ क्लीं कृष्णा
य सदा घ्राणं गोविंदायेति जिह्विकां॥ गोपीजनवल्लभाय पातु स्वाहाननं मम॥
२०॥ अष्टादशाक्षरो मंत्रः कंठं पातु दशाक्षरः॥ गोपीजनपदं वल्लभाय स्वाहा
भुजद्वयं॥२१॥ क्लीं ग्लौं क्लीं श्यामलांगाय नमः स्कंधौ दशाक्षरः॥ क्लीं कृष्ण क्लीं
करौ पायात् क्लीं कृष्णाय गं जं मम॥२२॥ हृदयं भुवनेशाय क्लीं कृष्णाय स्तनौ म
म॥ गोपालायाग्निजायांतः कुक्षियुग्मं सदावतु॥२३॥ क्लीं कृष्णाय सदा पा
तु पार्श्वयुग्ममनुत्तमः॥ कृष्णगोविंदकौ पातां स्मराद्यंगेयुतो मनुः॥२४॥
अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षरोऽवतु॥ पृष्ठं क्लीं कृष्णकं काजं क्लीं कृष्णाया
दिगंतकः॥२५॥ सक्थिनी सततं पातु श्रीं ह्रीं क्लीं कृष्णठद्वयं॥ ऊरू सप्ताक्षरः पा
यात् त्रयोदशाक्षरोऽवतु॥२६॥ ह्रीं श्रीं क्लीं पदतो गोपीजनवल्लभाय पदं॥ ततः १
स्वाहेति पायुं वै क्लीं ह्रीं श्रीं षोडशार्णकः॥२७॥ जानुनी च सदा पातु ह्रीं श्रीं क्लीं

चदशाक्षरः॥त्रयोदशाक्षरःपातुजंघेचक्राद्युतायुधः॥१८॥अष्टादशाक्षरो
क्लींश्रींपूर्वकोविंशवर्णकः॥सर्वांगमेसदापातुद्वारकानायकोबली॥१९॥
नमोभगवतेपश्चात्वासुदेवायततःपरं।ताराद्योद्वादशार्णोयंप्राच्यांमांसर्व
दावतु॥२०॥क्लींश्रींक्लींदशवर्णस्तुक्लींक्लींश्रींषोडशाक्षरः॥गदायुक्तायुधोविष्णु
र्मामग्नेर्दिशिरक्षतु॥२१॥क्लींश्रींदशाक्षरोमंत्रोदक्षिणेमांसदावतु॥तारोनमो
भगवतेरुक्मिणीवल्लभायच॥२२॥स्वाहेतिषोडशार्णोयंनैर्ऋत्यांदिशिरक्ष
तु॥क्लींहृषीकेशपदांतायनमोमांवारुणेवतु॥२३॥अष्टादशार्णकोमंत्रो
वायव्येमांसदावतु॥श्रीमायाकामकृष्णायगोविंदायद्विगोमनुः॥२४॥द्वाद
शार्णात्मकोविष्णुरुत्तरेमांसदावतु॥वाग्भवंकामकृष्णायक्लींगोविंदायततः
परं॥२५॥श्रीगोपीजनवल्लभायस्वाहाहस्तौततःपरं॥द्वाविंशत्यक्षरोमंत्रो
ईशान्येचसदावतु॥२६॥कालीयस्यफणामध्येनित्यंनृत्यंकरोतितं॥नमामि

देवकीपुत्रंनत्वाराजानमच्युतं॥२७॥द्वात्रिंशदक्षरोमंत्रोयथोमांसर्वदा
२ वतु॥कामदेवायविद्महेपुष्पबाणायधीमहि॥तन्नोनंगःप्रचोदयात्॥
गायत्रीकामदेवस्यसेयंपातुचोर्द्ध्वतः॥इतितेकथितंविप्रब्रह्ममंत्रौघविग्र
हं॥२८॥त्रैलोक्यमंगलंनामकवचंब्रह्मरूपकं॥ब्रह्मेशप्रमुखाधीशनारा
त्रै यणमुखाच्युतं॥तवस्नेहान्मयाख्यातंप्रवक्तव्यंनकस्यचित्॥गुरुंप्रण
म्यविधिवत्कवचंप्रपठेत्ततः॥सकृद्द्विस्त्रिर्यथाज्ञानंसोपिसर्वतपोमयः॥
मंत्रेषुसकलेष्वेवदेशिकोनात्रसंशयः॥३१॥शतमष्टोत्तरंचात्रपुरश्चर्यावि
धिःस्मृतः॥हवनादीन्दशांशेनकृत्वातत्साधयेद्ध्रुवं॥३२॥यदिस्यात्सिद्धक
वचोविष्णुरेवभवेत्स्वयं॥स्पर्द्धामिहूयसततंलक्ष्मीर्वाणीवसेन्मुखे॥३३
पुष्पांजल्यष्टकंदत्वामूलेनैवपठेत्सकृत्॥दशवर्षसहस्राणांपूजायाःफ २
लमाप्नुयात्॥भूर्जेविलिख्यगुटिकांस्वर्णस्थांधारयेद्यदि॥३४॥कंठेवा

दक्षिणेबाहौसोपिविष्णुर्नसंशयः॥ अश्वमेधसहस्राणिवाजपेयशतानिच
३६॥ महादानानियान्येवप्रादक्षिण्यंभुवस्तथा॥ कलांनार्हन्तितान्येवसकृदु
3 च्चारणात्ततः॥३७॥ कवचस्यप्रसादेनजीवन्मुक्तोभवेन्नरः॥ पुत्रपौत्रसमायु
क्तस्त्रैलोक्यविजयीभवेत्॥३८॥ इदंकवचमज्ञात्वाभजेद्यःपुरुषोत्तमं॥ शत
लक्षप्रजप्तोपिनमंत्रंसिद्धिदायकः॥३९॥ ॥इतिसनत्कुमारतंत्रेत्रैलोक्यमं
गलंनामकवचं॥ संपूर्णं॥ ॥श्रीरस्तु॥ ॥श्रीगोपीजनवल्लभोजयतु॥ ॥